संस्कृत-वार्ता:

01/02/2026

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· वित्तमन्त्री निर्मला सीतारमण: अद्य अस्य वित्तीयवर्षस्य आय-व्यय-पत्रकं प्रस्तुतवती। यस्मिन् क्षमता-निर्माणे सौविध्येषु च सविशेषं सबलं प्रतिपादितवती।

· प्रधानमन्त्री नरेन्द्र मोदी अवदत् यत् एतत् आय-व्यय-संकल्प-पत्रम् 'मेक इन इण्डिया' तथा 'आत्मनिर्भर भारतम्' चेत्येतयोः पदक्षेपयोः नूतनां गतिं प्रदातुं महत्वाकाङ्क्षी संरचनां प्रस्तौति।

· औद्योगिकसङ्घटनैः अस्य आय-व्यय-संकल्प-पत्रस्य स्वागतं कृतम्, येन सकल-गृह-उत्पादनम् वर्धिष्यते।

· केन्द्रीयमन्त्री एतत् आय-व्यय-संकल्प-पत्रं प्रत्येकं क्षेत्रं, प्रत्येकं वर्गं तथा प्रत्येकं नागरिकं च सशक्तीकर्तुं स्पष्टा योजना, इति वर्णितवान् ।

<u>आयव्ययपत्रकं</u>

वित्तमन्त्री निर्मला सीतारमण: अद्य लोकसभायां अस्य वित्तीयवर्षस्य आय-व्यय-पत्रकं प्रस्तुतवती। तस्याः एतत् अभिलेखात्मकं नवमं आय-व्यय-पत्रकम् अस्ति। वित्तमन्त्री अद्य माघपूर्णिमायाः तथा गुरु-रविदासस्य जन्मशताब्द्याः पावनावसरे प्रोक्तवती यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे प्रशासनेन सदैव परिष्कारार्थं जनहितार्थं च प्राथमिकता प्रदत्ता। अस्मिन् वित्तीय आय-व्यय-पत्रके आत्मनिर्भरभारतं लक्ष्यीकृत्य लोकनिवेशं सबलं प्रतिपादयन् विनिर्माण परिष्काराणां, राजकोषीय-व्यवस्थानां तथा मौद्रिक-स्थिरतानां च अनुसरणं विहितवन्तः। एतत् आय-व्यय-पत्रकं विशेषरूपेण क्षमता-निर्माणेषु परिष्कारेषु च ध्यानं केन्द्रीकरोति। एतत् आय-व्यय-पत्रकं युवाशक्ति द्वारा संचालितम् इति वित्तमन्त्री उक्तवती। सा अवदत् यत् एतत् आय-व्यय-पत्रकं आर्थिकविकासं गतिं प्रदातुं , नागरिकाणां क्षमता-निर्माणस्य आकाङ्क्षां पूरयितुं, तथा

“सबका साथ, सबका विकास” इति त्रिभिः प्रकल्पैः प्रेरितमस्ति । यस्य लक्ष्यं प्रत्येकस्य परिवारस्य, समुदायस्य, क्षेत्रस्य च संसाधनानां, सौविध्यानां अवसराणां च प्राप्तिं सुनिश्चितं करणीयम् अस्ति। वित्तमन्त्री अवदत् यत् कृषकाः, अनुसूचित-जातयः, अनुसूचित-जनजातयः, युवानः, निर्धनाः, महिलाः च विकासस्य लाभाः सम्प्राप्नुयुः। प्रशासनस्य संकल्पः शोषितानां वञ्चितानां प्रति च ध्यानं प्रदत्तमस्ति।

वित्तमन्त्रिणा घोषणा कृताऽस्ति यत् आगामि पञ्चवर्षेषु भारतं वैश्विक-बायोफार्मा-निर्माण-केन्द्ररूपेण विकसितुं दश-सहस्र-कोटि-रूप्यकाणां-परिव्ययेन “बायोफार्मा-शक्ति-परियोजना” समारप्स्यते। श्रम-प्रधान-वस्त्र-क्षेत्रस्य सुदृढीकरणार्थं वित्तमन्त्री खादी-ग्रामोद्योग, हस्त-शिल्पानां प्रोत्साहनाय “महात्मा-गांधी-ग्राम-स्वराज-उद्यम” परियोजनायाः शुभारम्भाय घोषणा विहिता । सा प्रोक्तवती यत् प्रशासनं नगराणां मध्ये विकास-संयोजक-मार्गरूपेण सप्त-तीव्रवेग-रेलमार्ग-पथं विकसितं करिष्यति। देशस्य वित्तीय-क्षेत्रस्य सुदृढतां प्रकाशयन्ती सा अवदत् यत् प्रशासनेन “विकसित-भारताय बैंक-क्षेत्रे उच्चस्तरीय-समितिं निर्मातुं निर्णयं विहितम् अस्ति। यस्य उद्देश्यं वित्तीय बैंक-क्षेत्रस्य व्यापक-समीक्षां कृत्वा वित्तीय-स्थिरता, समावेशनं तथा उपभोक्ता-संरक्षणस्य रक्षणम् अस्ति। कृत्रिम-बुद्धिमत्तायाः महत्त्वं वर्णयन्ती वित्तमन्त्री अवदत् यत् प्रौद्योगिक्याः स्वीकरणं कृषकाणां, महिलानां, युवानां तथा दिव्याङ्गजनानां सहैव सर्वेषां जनानां हिताय अस्ति, येन ते नूतनाः अवसराः प्राप्नुयुः। देशे क्रीडा-क्षेत्रस्य विकासाय क्रीडा-प्रतिभानां पोषणाय च सा अवदत् यत् प्रशासनं आगामि दशके क्रीडा-क्षेत्रस्य परिवर्तनाय “खेलो-इण्डिया-मिशन” इत्यस्य शुभारंभं करिष्यति।

<u>वित्तमंत्री-अर्थसंकल्प: भाषणम्</u>

प्रशासनं कृषकाणां आये वृद्धिं कर्तुं, दिव्याङ्गजनानां कृते मानसिक-स्वास्थ्य-आघात-सम्बन्धी-चिकित्सां प्रदातुं, विकास- वृत्यवसराणां गतिं प्रदातुं अपि च , पूर्वोदय-राज्येषु तथा उत्तर-पूर्वीय क्षेत्राणां विकासाय विशेषत्वेन प्रतिबद्धोस्ति। सा अरुणाचल-प्रदेशे, सिक्किमे, असमे, मणिपुरे, मिजोरमे , त्रिपुरायां च बौद्ध-परिपथानां विकासाय एकस्याः योजनायाः समारम्भाय घोषणा कृतवती। सा प्रोक्तवती यत् वित्तीय-वर्षे सकल-गृह उत्पादस्य चतुर्दशमलवाधिक-त्रि-

प्रतिशतमितं राजकोषीय-अपचितिः भविष्यति इति अनुमानितम्। यद्यपि वर्तमान-वित्तीय-वर्षे एतत् चतुर्दशमलवाधिक-चतुर्प्रतिशतमितं आसीत्। सा अवदत् यत् प्रशासनेन आयकर शुल्क-प्रतिवेदनस्य समय-सीमा विस्तारिताऽस्ति। जनाः जुलाई मासस्य एकत्रिंशत् दिनांक पर्यन्तं प्रतिवेदनं दातुं शक्नुवन्ति, तथा व्यावसायिक-संस्थाभ्यः न्यासेभ्यश्च अगस्त-मासस्य एकत्रिंशत् दिनांक पर्यन्तं प्रतिवेदनस्य समयः भविष्यति। वित्तमन्त्री अवदत् यत् पञ्चविंशत्यधिक-द्विसहस्र-तम-वर्षस्य आयकर-अधिनियमः, षडविंशत्यधिक-द्विसहस्र-तम वर्षस्य एप्रिल् मासस्य प्रथम दिवसात् प्रवर्तिष्यते। सा अपि अवदत् यत् सरलीकृताः आयकर-नियमाः तथा प्रपत्राणि शीघ्रमेव अधिसूचितानि भविष्यन्ति ।

<u>प्रधानमन्त्री- बजट</u>

प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् अस्य वर्षस्य केन्द्रीय आय-व्यय-पत्रकं 'मेक-इन-इण्डिया' तथा 'आत्मनिर्भर-भारत' इति उपक्रमयोः नूतनं प्रगतिं प्रदातुं महत्त्वाकाङ्क्षी संरचनां प्रस्तौति। एकस्मिन् दृश्य-श्रव्य-सन्देश माध्यमेन श्रीमोदी अवदत् यत् अस्य वर्षस्य आय-व्यय-पत्रकं भारतस्य परिष्काराणां कृते नूतनां ऊर्जां तथा गतिं प्रदास्यति। सः अवदत् यत् एतत् अर्थ-संकल्प-पत्रम् अद्यतनीयाः आकाङ्क्षाः यथार्थतां नयति तथा भारतस्य उज्ज्वल-भविष्यस्य आधारं सुदृढं करोति। प्रधानमन्त्री एतदपि अवोचत् यत् एतत् एकं विशिष्टं अर्थ-संकल्प-पत्रम् अस्ति, यत् राजकोषीय अपचितिं न्यूनीकरणे तथा मुद्रा-स्फीति-नियन्त्रणाय केन्द्रितम् अस्ति ।

प्रधानमन्त्री अवदत् यत् अद्यतनीयं आय-व्यय-संकल्प-पत्रम् ऐतिहासिकं अस्ति तथा च देशस्य सशक्तानां नारीणां भावनां प्रतिबिम्बयति। सः अवदत् यत् एतत् बहुशः अवसराणां द्वारम् अस्ति, यत् वर्तमानस्य स्वप्नान् साकारयति तथा च भारतस्य उज्ज्वलभविष्यस्य आधारं सुदृढं करोति। श्रीमोदी अस्मिन् विषये सबलं प्रतिपादितवान् यत् एतत् सप्त-चत्वारिंशदधिक-द्वि-सहस्र-तम-वर्षं यावत् भारतं विकसितराष्ट्रं कर्तुं दिशि उच्चतरम् आधारं अस्ति।

प्रधानमन्त्री मोदी अवदत् यत् प्रत्येकस्मिन् जनपदे छात्राणां कृते नूतनानां छात्रावासानां निर्माणस्य अभियानम् शिक्षां अधिकां सुलभां करिष्यति। सः एतदपि अवदत् यत् कृषि-दुग्धोत्पादन-मत्स्यपालन चेत्यादिषु क्षेत्रेषु प्रशासनेन सदैव प्राथमिकता

प्रदत्ता। श्रीमोदिना प्रोक्तं यत् अस्मिन् आय-व्यय-पत्रके नारिकेल- चन्दन चेत्यादीनां उत्पादने संलग्नानां कृषकाणां कृते महत्त्वपूर्णानि उपायानि कृतानि । सःइतोपि अवदत् यत् आय-व्यय-पत्रके कृताः प्रावधानाः विभिन्नेषु क्षेत्रेषु नेतॄन्, नवप्रवर्तकान्, रचनाकारांश्च निर्मास्यन्ति।

## भारतस्य एसोचैम

भारतस्य एसोचैम इति भारतीय –वाणिज्य- उद्योग -मंडलेन वित्तीय-वर्षस्य आय-व्यय-संकल्प-पत्रस्य प्रशंसां कुर्वन् प्रोक्तं यत् एतेन देशस्य सकल-गृह -उत्पादनं वर्धयितुं साहाय्यं भविष्यति। आकाशवाण्याः वार्ताहरैः सह विशेष-संवादे एसोचैम इत्यस्य अध्यक्षः निर्मलः के. मिंडा अवदत् यत् आयकर-सीमाशुल्क-नियमानां सरलीकरणेन व्यापारे सुलभता भविष्यति। सममेव अवदत् यत् एतेन आत्मनिर्भर-भारत तथा 'मेक इन इंडिया' इति पदक्षेपानां समर्थनं भविष्यति।

।। इति वार्ता: ।।